## Citraka

**चित्रकोऽनलनामा च पाठी व्यास्तथोषण: । (Bpn)**

Synonyms of Citraka are Anala, Pathi, Vyastha, Usna.

**चित्रको दहनो व्यालः पाठीनो दारुणोऽग्निकः ॥**
**ज्योतिष्को वल्लरि वह्निः पालि पाठी कटुः शिखी ।**
**कृष्णारुणोऽनलो द्वीपी चित्रभानुश्च पावकः ॥ (Dhn)**

Citraka, Dahana, Vyala, Pathina, Daruna, Agni ka, Jyotishka, Vallari, Vahni, Pali, Pathi, Katu, Sikhi, Krsnaruna, Anala, Dvipi, Citrabhanu, Pavaka-are the synonyms of Citraka.

**कालो व्यालः कालमूलोऽतिदाप्यो**
**मार्जारोऽग्निर्दाहकः पावकश्च ।**
**चित्राङ्गोऽयं रक्तचित्रो महाङ्गः**
**स्याद्रुद्राह्वश्चित्रकोऽन्यो गुणाढ्यः ॥ (Rjn)**

Kala, Vyala, Kalamula, Atidapya, Marjara, Agni, Dahaka, Pavaka, Citranga, Rakta citra, Mahanga are the 11 synonyms of Rakta Citraka. Another variety of Citraka is superior in quality.

**चित्रकोऽग्निसमः पाके शोफार्शकृमिष्ठहा ।**
**कफवातप्रशमनो विधिना च रसायनम् ॥ (Mdn)**

Citraka is agni samana in paka. It cures sopha, arsa, krmi, kustha, pacifies kapha, vata and if used appropriately as a rasayana.

**चित्रकः कटुकः पाके वह्निकृत्पाचनो लघुः ॥**
**रूक्षोष्णो ग्रहणीकुष्ठशोफार्शःकृमिकासनुत् ।**
**वातश्लेष्महरो ग्राही वातार्शःश्लेष्मपित्तहृत् ॥ (Bpn)**

Citraka is ruksa, laghu in property, usna in potency, katuka in paka, increases vahni, is pacana, grahi in karma, cures grahani, kustha, sopha, arsa, krmi, kasa, vata slesma, alleviates vata, arsa, slesma, pitta.

**चित्रकोऽग्निसनः पाके कटुकः कफशोफजित् ।**
**वातोदरार्शोग्रहणीक्षयपाण्डुविनाशनः ॥ (Dhn)**

Citraka is agni sama, katu in paka, cures kapha sopha, vata, udara, arsa, grahani, ksaya and pandu.

**स्थूलकायकरो रुच्यः कुष्ठघ्नो रक्तचित्रकः ।**
**रसे नियामिको लोहे वेधकश्च रसायनः ॥ (Rjn)**

Rakta citraka is sthula kaya kara, ruchya, cures kustha, is used in parada niyamana, loha vedhana (in processing of mercury and related procedures) and as rasayana.

**चित्रकः पाचको रूक्षो लघुश्चाग्निप्रदीपनः ।**
**पाके कटुग्राईकश्च तिक्तोष्णो रुचिदो मतः ॥**
**रसायनोऽग्निसदृशः शोफकुष्ठार्शःकासहा ।**
**कृमीन्वातोदरं कण्डूं यकृत् ग्रहणीं तथा ॥**
**आमं क्षयं चोदरं च नाशयेदिति कीर्त्तितः ।**
**कटुत्वात्कफहा प्रोक्तस्तिक्तवात्पित्तनाशकः ।**
**उष्णत्वाद्वातहा प्रोक्तो मुनिभिः तत्वदर्शिभिः ॥ (Nir)**

Citraka is tikta in taste, ruksa, laghu in property, usna in potency, katu in paka, pacaka, agni pradipana, grahaka, rucida, rasayana, agni sadrsa, cures sopha, kustha, arsa, kasa, krmi, vatodara, kandu, yakrt vikara, grahani, ama, ksaya, udara. Due to katutva it alleviates kapha, tiktatva it alleviates pitta, and due to usnatva it alleviates vata.

चित्रको दीपनस्तिक्तः कटुः पाके रसे लघुः ।
अग्निवत् पाचनो रूक्षो वीर्योष्णो रोचनो जयेत् ।।
ग्रहणीकफवातामशोफकुष्ठोदरकृमीन् ।
कटुकत्वात् कफं हन्ति तिक्तत्वात् पित्तनाशनः ।।
औष्णयाद् वातं प्रशमयेत् त्रिदोषघ्नोऽग्निदापनः ।
तच्छाकं लघु संग्राहि कफपित्तविनाशनम् ।। (Kdn)

Citraka is tikta, katu in rasa, laghu, ruksa in guna, usna in veerya, katu in paka, dipana, agnivat in pacana, rocana, cures grahani, kapha, vata, ama, sopha, kustha, udara, krmi. Due to katu rasa it is kapha hara, tikta rasa it is pitta hara, usnatva it is vata hara. It is tridoshaghna, agni dipana. Its saka is laghu in property, sangrahi in karma, and kapha pitta nasana.

चित्रकमूलं दीपनीयपाचनीयगुदशोफाशःशूलहराणाम् । (C.S.Su)

Citraka mula is dipaniya, pacaniya in karma, cures guda sopha, arsa sula.